# महाभाष्यम्

# ( पञ्चमाह्निकात् नवाह्निकपर्यन्तम् )

## अन्ववेक्षणात्मकप्रश्नाः

1.ईदूतौ च सप्तम्यर्थे इति सूत्रघटकार्थग्रहणेन किं ज्ञाप्यते?

2.अदसो मात् इति सूत्रे मादग्रहणेन किं विशेष्यते?

3.शे इति सूत्रेण "काशे" "कुशे" इत्यादौ प्रगृह्यसञ्ज्ञा कथन्न?

4.निपात एकाजनाङ् इति सूत्रे निपातग्रहणं किमर्थम् ?

5.वर्णग्रहणे जातिग्रहणमित्यस्य ज्ञापकं किम् ?

6."ओतश्च्विप्रतिषेधः" इति वार्तिकस्यार्थः कः?

7."नोञः एकादेशः उञ्ग्रहणेन गृह्यते" इत्यस्य किं ज्ञापकम् ?

8.प्रनिदारयति इत्यादौ घुसञ्ज्ञा कथन्न भवति?

9.वार्तिककारमते आद्यन्तयोः किं लक्षणम्?

10.आद्यन्तवदेकस्मिन् इति योगस्य भाष्योक्तमेकं प्रयोजनं लिखत।

11.शरत्प्रभृतिषु विपाट्शब्दपाठेन किं ज्ञाप्यते?

12.अकृत्रिमाधिकरणस्योदाहरणं किम्?

13.शतानि,सहस्राणि इत्यादौ षट्सञ्ज्ञा कथन्न भवति?

14.एकहलानीत्यत्र एकशब्दार्थः कः?

15.सर्वादीनीत्यत्र कीदृशो बहुव्रीहिः?

16.सर्वनामानीत्यत्र णत्वं कस्मान्न भवति?

17.निपातनं नाम किम्?

18.स च भवांश्च इति विग्रहे किं रूपम्?

19.विभाषादिक्समासे इति सूत्रे दिग्ग्रहणं किमर्थम् ?

20.तृतीयासमासे इति सूत्रे समासग्रहणं किमर्थम्?

21.स्वमज्ञातिधनाख्यायामिति सूत्रे आख्याग्रहणं किमर्थम्?

22."अपुरि" इति वार्तिकस्यार्थमुदाहरणञ्च लिखत।

23.क्रियाप्रधानतद्धितस्योदाहरणं किम्?

24.न प्रत्ययलक्षणेनाव्ययसञ्ज्ञा भवतीत्यस्य किं ज्ञापकम् ?

25.भाष्ये "कुम्भकारेभ्यः " इत्यत्राव्ययसञ्ज्ञायाः वारणं कथं कृतम् ?

26.तस्थिवान् इत्यत्र कः प्रत्ययः?

27.अव्ययीभावस्याव्ययत्वे किं प्रयोजनम् ?

28.नवेति विभाषा इति सूत्रे इतिकरणं किमर्थम् ?

29.मितः अभक्तत्वे के दोषाः ?

30.एच इग्वचनं किमर्थम्?

31.स्थानेन्तरतमः इति सूत्रस्य भाष्योक्तं प्रयोजनं किम्?

32.नानुबन्धकृतमनेकाल्त्वमिति परिभाषायाः प्रयोजनं भाष्ये किमुक्तम्?

33.स्थानिवत्सूत्रे वत्करणं किमर्थम्?

34. "यत्र प्राधान्येनालाश्रियते तत्रैव प्रतिषेधः"इत्यस्य किं प्रयोजनम्

35.नापवादे उत्सर्गकृतं भवतीत्यस्य ज्ञापकं किम्?

36.ङ्याब्ग्रहणे अदीर्घः इति वार्तिकस्यार्थं लिखत।

37अचः परस्मिन् पूर्वविधौ इति सूत्रे परस्मिन् इति किमर्थम्?

38.पूर्वत्रासिद्धे न स्थानिवदित्यस्य भाष्योक्तप्रथमप्रयोजनं लिखत।

39.पूर्वत्रासिद्धे न स्थानिवदित्यस्य केषु स्थलेषु दोषः?

40. रूपस्थानिवद्भावस्य किं ज्ञापकम्?

41. णौ स्थानिवद्भावस्य किं ज्ञापकम्?

42.सिद्धं तु प्रसक्तादर्शनस्य लोपसञ्ज्ञत्वात् इति वार्तिकस्य किं प्रयोजनम्?

43.प्रत्ययस्य लुक्श्लुलुपः इति सूत्रे प्रत्ययग्रहणं किमर्थम्?

44.प्रत्ययलोपे प्रत्ययलक्षणमिति सूत्रे प्रथमप्रत्ययग्रहणं किमर्थम्?

45.न प्रत्ययलक्षणेन भसञ्ज्ञा भवतीत्यस्य ज्ञापकं किम् ?

46.प्रत्ययलोपे प्रत्ययलक्षणमिति सूत्रस्य किं प्रयोजनम्?

47.अभूवन् इत्यत्र प्रत्ययलक्षणेन जुस्भावः कथन्न?

48.न लुमता तस्मिन्निति न्यासे को दोषः?

49.तस्मिन्निति निर्दिष्टे पूर्वस्य इति सूत्रे निर्दिष्टग्रहणं किमर्थम्?

50.स्वं रूपं शब्दस्याशब्दसञ्ज्ञेति सूत्रे रूपग्रहणं किमर्थम्?

**--------*****--------**